साहित्यम्                    शास्त्री III (प्रतिष्ठा)                    24-04-2021

अष्टम पत्रम् ।                    मालविकाग्निमित्रम् ।                    श्लोकव्याख्या ।

" पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥"

महाकविकालिदासविरचितस्य 'मालविकाग्निमित्रस्य' नाटकस्य आरम्भे सूत्रधारस्य एषोक्तिः । सूत्रधारः कथयति यत् विदुषां सभा मामकथयत् यत् महाकविकालिदासेन विरचितं मालविकाग्निमित्रं नाटकमस्मिन् वसन्तोत्सवावसरे अभिनेयम् । अतएव संगीतकार्यं प्रारभं कुरु। पारिपार्श्वकमते एतत् कथनमुचितं नास्ति । तस्य मते प्रथितं यशो येषान्ते तेषां विख्यातकीर्तीनां भाससौमिल्लककविपुत्रादीनां प्राचीनानां विख्यातकवीनां प्रबन्धान् ग्रन्थान् अतिक्रम्य कालिदासस्य क्रियायां ग्रन्थे आदराधिक्यं कथं? स्वकीयमर्थं सम्पादयितुं सूत्रधारः पुनः कथयति →

अन्वयः → सर्वं पुराणम् इति एव साधु न, काव्यं नवम् इति एव अवद्यं न । सन्तः परीक्ष्य अन्यतरत् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः (भवति) ।

शब्दार्थो व्याकरणञ्च → सर्वं = सम्पूर्णम् । पुराणम् = प्राचीनम् । इति एव = अनेन कारणेन । साधु न = रमणीयं भवितुमर्हति । नवम् = नवीनम् । अवद्यम् = निन्दनीयम् । सन्तः = विद्वांसः । परीक्ष्य = गुणदोषौ पूर्णरूपेण आलोच्य । भजन्ते = सेवन्ते । मूढः = मूर्खः । परस्य = अन्यस्य । प्रत्ययेन = ज्ञानेन । नेया = प्राप्या ।

परप्रत्ययनेय बुद्धिः → परस्य प्रत्ययेन नेया बुद्धिर्यस्य तादृशः ।

अत्रार्थान्तरन्यासालङ्कारः त्रिष्टुप् छन्दस्य उपजाति भेदः (उपेन्द्रवज्रा + इन्द्रवज्रा) ।

24-04-21

डॉ० निर्मलकुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

अनिवार्यपत्रम् । शास्त्री II 24-04-2021

साहित्यम् । रघुवंशम् । व्याख्या ।

व्याकरण के छात्र हेतु ।

" रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमती निराशम् ॥"

श्लोकोऽयं महाकविकालिदासकृतस्य रघुवंश-महाकाव्यस्य षष्ठसर्गान्तर्गतेन्दुमतीस्वयंवरवर्णनादवच्यूतः अस्ति ।

अस्मिन् श्लोके कविकुलगुरुकालिदासः स्वयंवरमण्डपे अवस्थितस्याजस्य सर्वोत्कृष्टं सौन्दर्यं वर्णयति – मन्मथमिव कुमारम् अजं विलोक्य तत्रोपस्थितानां नृपतीनां मनसि इन्दुमतीप्राप्ति-विषये नैराश्यमजायत ।

अन्वयः → रतेः गृहीतानुनयेन ईश्वरेण प्रत्यर्पितस्वाङ्गं कामम् इव काकुत्स्थम् आलोकयतां नृपाणां मनः इन्दुमतीनिराशं बभूव ।

शब्दार्थः व्याकरणञ्च → रतेः = स्मरप्रियायाः । गृहीतानुनयेन = स्वीकृतविनयेन, ( गृहीतः अनुनयः येन सः, तेन ) । ईश्वरेण = शिवेन । प्रत्यर्पितस्वाङ्गं = प्रदत्तनिजशरीरम् ( प्रत्यर्पितं स्वस्य अङ्गं यस्य सः, तं ) । इव = यथा । काकुत्स्थम् = अजकुमारम् । आलोकयतां = पश्यताम् । नृपाणां = राज्ञाम् । मनः = चित्तम् । इन्दुमतीनिराशं = विदर्भराजसुतानिरभिलाषम् ( इन्दुमत्यां निर्गता आशा यस्मात् तत् ) । बभूव = अभूत् ।

शृङ्गाररसप्रधाने अस्मिन् श्लोके प्रसादयुक्तमाधुर्यगुणः उत्प्रेक्षालङ्कारः उपजातिवृत्तञ्चास्ति ।

24-04-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ

24-04-2021

उपशास्त्री I

अनिवार्य प्रथमपत्र।

संस्कृतानुवाद।

विगत कक्षा का पुनरावलोकन →

हिन्दी भाषा के इस वाक्य पर विचार करें → मैं कलम से पत्र लिखता हूँ।
इस वाक्य में लिखता हूँ क्रिया है जो संस्कृत के लिख् धातु से बना है। क्रिया वर्तमान काल यानि लट् लकार की है। इस वाक्य का कर्ता मैं है। मैं यानि अहम् के अनुसार उत्तम पुरुष, एक वचन में क्रियापद लिखामि होगा।
इस वाक्य में पत्र कर्म है अतः पत्र में द्वितीया विभक्ति 'कर्मणि द्वितीया' सूत्र से होगी।
चूँकि पत्र नपुंसक लिङ्ग, एक वचन में है अतः पत्रम् लिखना होगा। कलम इस वाक्य में करण कारक है क्योंकि लिखना क्रिया में कलम सहायक है। साधकतमं करणम्, करणे तृतीया सूत्र से तृतीया, एकवचन में कलमेन होगा।
अब हिन्दी के इस वाक्य "मैं कलम से पत्र लिखता हूँ" को संस्कृत भाषा में अनुवाद हुआ →
अहं कलमेन पत्रं लिखामि।

हिन्दी वियोगात्मक भाषा है जबकि संस्कृत संयोगात्मक। इस पर चर्चा अगली कक्षा में की जाएगी।

(हस्ताक्षर) 24-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

24-04-2021

अभिकर्षं प्रथमवर्षम् । शास्त्री I (आनर्स)

साहित्यम् । व्याकरणेतर छात्रेभ्यः ।

पारिभाषिक शब्दाः →

1. अच् → अच् प्रत्याहारः अस्ति । 'अच्' प्रत्याहारे समस्ताः स्वरवर्णाः आयान्ति ।

चतुर्दश माहेश्वर सूत्राणि सन्ति । तत्र प्रथम चत्वारि सूत्राणि सन्ति → 1. अ इ उ ण् 2. ऋ ऌ क्
3. ए ओ ङ् 4. ऐ औ च् ।
प्रथम सूत्रस्य प्रथमो वर्णः 'अ' तथा चतुर्थ सूत्रस्य अंतिमो हल् वर्णः 'च्' परस्परं मिलित्वा 'अच्' प्रत्याहारस्य निर्माणं कुरुतः । प्रत्याहारनिर्माणे सूत्रस्य अंतिमो हल् वर्णः त्याज्यः भवति । एवमानुसारेणात्र अच् प्रत्याहारे अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ वर्णाः आयान्ति ।
दीर्घ स्वर वर्णाः आ, ई, ऊ, ॠ, ॡ वर्णानाम् अध्याहारः भवति ।

2. हल् → 'हल्' अपि प्रत्याहारः । अस्मिन् प्रत्याहारे समस्ताः व्यञ्जनवर्णाः सन्ति ।

3. इत् → उपदेशे अन्त्यं 'हल्', 'अनुनासिक स्वरश्च' इत्संज्ञकः भवति । यथा → अक्, इत्यस्मिन् 'क्' इत्संज्ञकः अस्ति ।

4. लोपः → प्रसक्तस्य अदर्शनं लोप संज्ञं स्यात् । अथवा विद्यमानस्य श्रवणाभावः 'लोप' संज्ञकः भवति ।

(हस्ताक्षर) 24-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।